**सप्तमः पाठः**

# विश्वभारतीयम्

**संस्कृतभाषा न केवलं विश्वस्य प्राचीनतमा भाषा, अपितु वैज्ञानिकी भाषा अप्यस्ति। अस्याम् अस्माकं भारतीयानां पूर्वजानां सर्वमपि ज्ञान–विज्ञानं निहितमस्ति। एषा भाषैव भारतीयभाषाणाम्, भारतीयसाहित्यस्य च उपजीव्यभाषा अस्ति। संस्कृतेन विना भारतीयभाषाणां, भारतीयसाहित्यस्य, वेद–पुराणोपनिषत्–कला–धर्म–संस्कृति–दर्शनप्रभृतीनां ज्ञानं प्राप्तुं न शक्यते । पाणिनीयव्याकरणसंस्कृता इयं भाषा न केवलं भारतीयैरपितु पाश्चात्यैः विद्वद्भिः अपि प्रशंसिता, सम्मानिता पुरस्कृता च वर्तते। संस्कृतस्य सार्वकालिकं सार्वभौमिकं च महत्त्वं वीक्ष्य समये–समये प्रसिद्धैः महापुरुषैः राजनयिकैः संस्कृतविषये स्वकीयं मन्तव्यं प्रकटितम् । पाठेऽस्मिन् केषाञ्चित् महापुरुषाणां संस्कृतकेन्द्रिताः विचाराः सङ्कलिताः वर्तन्ते।**

**आचार्यः** - भोःछात्राः ! ध्यानेन शृण्वन्तु । वयं संस्कृतं पठामः, लिखामः, वदामः, किञ्चिन्महत्त्वमपि जानीमः । किन्तु संस्कृतस्य विषये भारतीयाः, वैदेशिकाः विद्वान्सः किं कथयन्ति भवन्तः जानन्ति वा ?

**सर्वे छात्राः** - आचार्य ! न जानीमः ।

**आचार्यः** - तर्हि अद्य संस्कृतविषये मूर्धन्यविदुषां, प्रसिद्धराजनेतॄणां वैदेशिकानां विचाराणां चर्चां कुर्मः ।

**दिशा** - आचार्य ! के-के भारतीयाः विद्वान्सः संस्कृतविषये उक्तवन्तः ?

**आचार्यः** - नैके विद्वान्सः, राजनेतारः, साहित्यकाराश्च संस्कृतस्य महत्त्वं प्रतिपादितवन्तः । भारतीयेषु महात्मागान्धि-पं.जवाहरलालनेहरु-महर्षिअरविन्दस्वामिविवेकानन्दप्रभृतयः, तथा च वैदेशिकेषु मैक्समूलरमैक्डानल-वेबर-विलियम-बॉप-हीरेन प्रभृतयः उल्लेखनीयाः ।

**मृदुलः** - आचार्य ! महात्मागान्धिः संस्कृतविषये किमुक्तवान् ?

**आचार्यः** - महात्मागान्धिः अवदत् - ''यत् संस्कृतम् अस्माकं भारतीयभाषाभ्यः गङ्गा नदी अस्ति । अहं चिन्तयामि यदि संस्कृतगङ्गा शुष्का भवेत् तर्हि सर्वाः अपि भाषाः सारहीनाः स्युः''।

**प्रत्युषः** - स्वामिविवेकानन्दः किमुक्तवान् ?

**आचार्यः** - विवेकानन्दः उक्तवान् यत् ''संस्कृतम् अनिवार्यतया शिक्षणीयम्, यतोहि तस्योच्चारणध्वनिरेव राष्ट्रियभावम् आत्मगौरवम् उदात्तभावञ्च जनयति । किन्तु अस्माभिः सर्वैरपि भारतीयैः संस्कृतस्य प्रसारे प्रचारे च प्रयत्नः न क्रियते इति खेदस्य विषयः ।''

**यजुषः** - भारतस्य प्रथमप्रधानमन्त्री पं. जवारहलालनेहरु : अपि संस्कृतभक्तः इति श्रूयते । असौ संस्कृतभाषाविषये किं चिन्तयति ?

**आचार्य:** - संस्कृतसन्दर्भे एकदा पं. नेहरु: उक्तवान् यत्-''यदि कश्चित् मां पृच्छेत् यत् भारतस्य उदात्ततमकोष: क: ? अथवा भारतस्य सर्वश्रेष्ठा सम्पत्ति: का ? तर्हि अहं तु कथयिष्यामि संस्कृतभाषा अथवा संस्कृतवाङ्मयम् एव। अहं विश्वसिमि यावत् संस्कृतभाषा जीवति, जीवने प्रभवति तावत् भारतराष्ट्रस्य मूलभूता एकता स्थास्यत्येव।''

**रजत:** - अन्येषां साहित्यकाराणां विषयेऽपि ज्ञातुम् इच्छामि।

**आचार्य:** - आम् ! अहं सङ्क्षेपेण वदामि - साहित्यकार: राजनेता डॉ. सम्पूर्णानन्द: अवोचत् यत् - ''संस्कृतमेव अस्य देशस्य राष्ट्रभाषा भवितव्या। संस्कृते अमूल्यरत्नानि सन्ति। संस्कृतं न केवलं जीवितानाम् अपितु दिवङ्गतानां कृतेऽपि सञ्जीवनी अस्ति'' इति।

अपि च साहित्ये घुमक्कड़धर्मस्य प्रस्तावक: साहित्यकार: राहुलसांस्कृत्यायनोऽपि उक्तवान् यत्- ''अस्मत्प्राचीनतमा वाणी संस्कृतरूपेण अधुनाऽपि विद्यमाना। तत्त्वत: यथा हिन्दीकथासाहित्यादीनाम् अध्ययनं भवति तथा संस्कृतग्रन्थानाम् अपि अध्ययनमध्यापनञ्च सर्वत्र भवेत्।''

**गिरिराज:** - महर्षे: अरविन्दस्य संस्कृतविषये कोऽभिप्राय: ?

**आचार्य:** - महर्षि: प्राह - ''सरलसंस्कृतमेव भारतराष्ट्रस्य राष्ट्रभाषा भवेत्।'' अयमेव भाव: श्रीमातु: कथनेऽपि दृश्यते सा ''संस्कृतमेव राष्ट्रभाषाभवितुम् अर्हति'' इत्युक्तवती। अन्येऽपि प्रसिद्धा: नायका: संस्कृतस्य प्रशंसां कृतवन्त: महनीयतां च स्वीकृतवन्त:। यथा - भारतस्य प्रथम: राष्ट्रपति: डॉ. राजेन्द्रप्रसाद: कथितवान् यत् ''संस्कृतसाहित्यं न केवलं भारतस्य कृते अपितु मानवजाते: कृते अमूल्यधनम् अस्ति''।

**पङ्कज:** - आचार्य ! अन्यधर्मावलम्बिन: अपि संस्कृतस्य प्रशंसका: खलु ?

**आचार्य:** - आम् ! प्रसिद्ध: मुस्लिमविचारक: बदरुद्दीनतय्यबमहोदय: उक्तवान् यत् ''मम मते प्रत्येकम् अपि हिन्दु:, मुस्लिम:, भारतीयो वा संस्कृतज्ञो भवेदिति''।

अन्यच्च प्रसिद्ध: न्यायवेत्ता मु. अली छागला उक्तवान् यत् ''ममेच्छा यत् मातृभाषया सह संस्कृतशिक्षा अनिवार्या भवेत्।'' संस्कृतभाषा प्राचीनार्वाचीनयोर्मध्ये सेतुरस्तीति।

**सलीम:** - आचार्य ! संस्कृतविषये भारतीयानां मन्तव्यम् अवगतम्। अधुना वैदेशिकानां विषयेऽपि ज्ञातुम् इच्छामि।

**आचार्य:** - साधूक्तं त्वया। इदानीमहं वैदेशिकविदुषां संस्कृतविषयकं मन्तव्यं बोधयामि। ''विलड्यूरन्ट'' विख्यात: पाश्चात्यसमीक्षक: उक्तवान् यत् भारतम् अस्माकं जाते: जन्मभूमि:, तथा संस्कृतं यूरोपीयभाषाणां जननी अस्ति। संस्कृतमेव अस्माकं दर्शनस्य जननी, अरबदेशात् प्राप्तस्य गणितस्य जननी, ईसाईधर्मे बौद्धधर्मे च समाहितानां आदर्शानां जननी, ग्रामीणसमुदायेन स्वायत्तशासनस्य तथा गणतन्त्रस्य जननी, एवं प्रकारेण भारतमाता नानाविधरूपेषु अस्माकं सर्वेषां जननी अस्ति।

**जॉन:** - वैदेशिकेषु मैक्समूलरमहोदय: विख्यात:। तेन किमुक्तम् ?

**आचार्यः -** मैक्समूलरः उक्तवान् यत्- ''संस्कृतं विश्वस्य महत्तमा भाषा अस्ति''। एवमपि प्राध्यापकः बॉप उक्तवान् यत् - ''संस्कृतमेव सम्पूर्णविश्वस्य एका भाषा आसीत् कदाचित् इति''।

**करतारसिंहः-** इतरेषामपि वैदेशिकविचारकाणाम् अभिप्रायः अपि ज्ञातव्यः खलु ?

**आचार्यः -** सत्यमेव ! जानन्तु। विद्वान् मैक्डानल उक्तवान् यत् - ''वयं योरोपीयाः अद्यावधि स्ववर्णमालाम् अपि पूर्णीकर्तुं न समर्थाः परं भारतीयानां भाषा तथा भाषाविज्ञानं न केवलं पूर्णम् अपितु वैज्ञानिकम् अस्ति''। अन्यच्च विलियमजोन्समहोदयः उक्तवान् यत् - ''संस्कृतस्य रचना आश्चर्यकारिणी अस्ति। इयं ग्रीकभाषायाः अपेक्षया अधिकपूर्णा, लैटिनभाषायाः अपेक्षया अधिका समृद्धा तथा च उभयोः तुलनायाम् अति परिष्कृता वर्तते।''

**मनीषः -** केनापि अन्येन पाश्चात्यविदुषाम् अपि संस्कृतविषये किमपि उक्तम् ?

**आचार्यः -** आम् ! वेबर महोदयेन कथितं यत् - ''सम्प्रति सम्पूर्णे विश्वे पाणिनिरेव वैयाकरणेषु पूर्णः सर्वमान्यश्चास्ति। दर्शने व्याकरणे च प्रामाणिकतायाम् उर्वरतायाञ्च भारतीयाः उच्चतमस्थले प्रतिष्ठिताः।'' तथा च एच.एच. विल्सन् महोदयेन कथितम् यत् -

*न जाने विद्यते किं तन्माधुर्यमत्र संस्कृते।*
*सर्वदैव समुन्मत्ता येन वैदेशिका वयम्॥*

**सर्वे छात्राः-** आचार्य ! वयम् आनन्दिताः, संस्कृतं प्रति विश्वप्रसिद्धानां विदुषाम् अभिमतं श्रुत्वा, संस्कृतस्य वैश्विकं महत्त्वं च ज्ञात्वा। **उच्यते हि -**

*भारतीयैकता साधकं संस्कृतम्।*
*विश्वबन्धुत्वसम्पोषकं संस्कृतम्॥*

(सर्वे मिलित्वा श्लोकस्य सस्वरगायनं कुर्वन्ति)

## शब्दार्थः

विश्व+भारती+इयम्=विश्वभारतीयम्-यह विश्व की वाणी है। भारती - वाणी। इयम् - यह। विदुषाम् - विद्वानों के। वैदेशिकानाम् - विदेशियों के। नैके - अनेक। प्रभृतयः - इत्यादि। सारहीनाः - साररहित। शुष्का - सूखी। विश्वसिमि - विश्वास करता हूँ। दिवङ्गतानाम् - मरे हुए लोगों का। महनीयताम् - महानता को। अपितु - बल्कि। ममेच्छा - मेरी इच्छा। प्राचीनार्वाचीनयोर्मध्ये - पुराने और नये के बीच। सेतुरस्ति - पुल है। पाश्चात्यसमीक्षकः - पश्चिमी देश के समीक्षक। ज्ञातव्यः - जानना चाहिए। इतरेषामपि - दूसरों का भी। स्ववर्णमालाम् - अपनी वर्णमाला को। पूर्णीकर्तुम् - पूरा करने के लिए। सम्पोषकम् - पूरी तरह पोषण करने वाली।

## अभ्यासः

1. **एकपदेन उत्तरं लिखत –**

(क) ''संस्कृतभाषा भारतीयभाषाभ्यः गङ्गानदी अस्ति'' इति कः उक्तवान् ?

(ख) भारतस्य प्रथमप्रधानमन्त्री कः आसीत् ?

(ग) वैयाकरणेषु पूर्णः सर्वमान्यश्च कः ?

(घ) भारतीयैकतायाः साधकं किम् ?

(ङ) संस्कृतं कस्याः भाषायाः अपेक्षया अधिकं समृद्धम् ?

2. **एकवाक्येन उत्तरं लिखत –**

(क) संस्कृतभाषा कस्य पोषणं करोति ?

(ख) सर्वप्राचीना भाषा का अस्ति ?

(ग) श्रीमाता संस्कृतविषये किं कथयति ?

(घ) मैक्समूलरः संस्कृतविषये किमुक्तवान् ?

(ङ) अस्माकं सर्वेषां जननी का ?

3. **अधोलिखितप्रश्नानाम् उत्तराणि लिखत –**

(क) संस्कृतविषये विवेकानन्देन किं कथितम् ?

(ख) वेबरमहोदयेन संस्कृतविषये किमुक्तम् ? लिखत।

(ग) एच.एच.विल्सनमहोदयः संस्कृतविषये किम् उक्तवान् ?

4. **उचितशब्देन रिक्तस्थानपूर्तिं कुरुत –**

(क) भारतीयैकता .................................................. संस्कृतम्। (बाधकं/साधकं)

(ख) .................................................. वैदेशिकः विद्वान् अस्ति। (मैक्समूलरः/अरविन्दः)

(ग) .................................................. सम्पोषकं संस्कृतम्। (देशत्व/विश्वबन्धुत्व)

(घ) संस्कृतभाषा प्राचीनार्वाचीनयोर्मध्ये ................................ अस्ति। (सेतुः/केतुः)

(ङ) संस्कृतसाहित्यं मानवजातेः कृते ................................ अस्ति। (अमूल्यधनम्/मूल्यधनम्)

5. **यथायोग्यं योजयत – (कस्य कः कथनांशः अस्ति)**

| 'अ' | 'आ' |
|---|---|
| (क) संस्कृतम् अवश्यमेव शिक्षणीयम् | मैक्समूलरः |
| (ख) संस्कृतमेव राष्ट्रभाषा भवितव्या | मु. अली छागला |
| (ग) संस्कृतं भारतीयभाषाभ्यः गङ्गानदी इव | डॉ. सम्पूर्णानन्दः |
| (घ) मातृभाषया सह संस्कृतं शिक्षणीयम् | महात्मागान्धिः |
| (ङ) संस्कृतं विश्वस्य महत्तमा भाषा अस्ति | विवेकानन्दः |

6. **शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्धवाक्यानां समक्षं ''न'' इति लिखत -**

(क) संस्कृतं विश्वस्य महत्तमा भाषा अस्ति। ☐

(ख) संस्कृतस्य व्याकरणं सर्वमान्यं न अस्ति। ☐

(ग) संस्कृतभाषाया: अपेक्षया ग्रीकभाषा अधिकपूर्णा वर्तते। ☐

(घ) संस्कृतमाधुर्यं वैदेशिकै: अपि अनुभूतम्। ☐

(ङ) भारतीयैकतार्थं संस्कृतम् आवश्यकम् अस्ति। ☐

7. **निम्नलिखितशब्दानां मूलशब्दं विभक्तिं वचनं च लिखत -**

| शब्द: | मूलशब्द: | विभक्ति: | वचनम् |
|---|---|---|---|
| यथा - विषये | विषय | सप्तमी | एकवचनम् |
| (क) संस्कृतस्य | | | |
| (ख) विचाराणाम् | | | |
| (ग) सर्वै: | | | |
| (घ) प्रचारे | | | |
| (ङ) राजनेतृणाम् | | | |

8. **क्रियापदानां धातुं लकारं पुरुषं वचनं च लिखत -**

| क्रियापदम् | धातु: | लकार: | पुरुष: | वचनम् |
|---|---|---|---|---|
| यथा - पठाम: | पठ् | लट्लकार: | उत्तमपुरुष: | बहुवचनम् |
| (क) अवदत् | | | | |
| (ख) कथयति | | | | |
| (ग) जानन्ति | | | | |
| (घ) स्थास्यति | | | | |
| (ङ) भविष्यन्ति | | | | |

9. **अधोलिखितपदानां सन्धिविच्छेदं कृत्वा सन्धिनाम लिखत -**

यथा - विद्यालय: विद्या + आलय: = दीर्घस्वरसन्धि:।

(क) कथनेऽपि

(ख) स्थास्यत्येव

(ग) नैके

(घ) यद्यपि

(ङ) प्राचीनार्वाचीन:

### 10. अव्ययैः वाक्यनिर्माणं कुरुत -

यथा - एव - संस्कृतभाषा **<u>एव</u>** देववाणी अस्ति।

(क) यदि ................................................।

(ख) विना ................................................।

(ग) यत् ................................................।

(घ) च ................................................।

(ङ) कृते ................................................।

## योग्यताविस्तारः -

- संस्कृतभाषाविषये अन्ये के के विद्वांसः किं किमुक्तवन्तः अन्विष्य लिखत।
- "संस्कृतभाषा" इति विषयमाधृत्य निबन्धं लिखत।